सोमस्य वर्षः १। ८। फलम्।
स्त्रीपुत्रकलहश्चैव वित्तनाशं मनःक्षतिम्।
करोति क्लेशमत्यर्थं राहोरन्तर्गतो विधुः॥
कुजस्य मासाः १०। २०। फलम्।
विषशस्त्राग्निचौरेभ्यो नियतं दारुणं भयम्।
पातस्यान्तगतः कुर्य्यान्नराणां भूमिनन्दनः॥
बुधस्य वर्षः १। १०। २०। फलम्।
ज्वरक्षुद्भिः संपीडा कलहं स्वजनैः सह।
भृत्यापत्येषु विविधं कुर्य्यात् पातान्तरे बुधः॥
शनेर्वर्षः १। १। १०। फलम्।
स्त्रीपुत्रैः कलहो नित्यं बान्धवैः सह वैरिता।
भवेत् बहुधा दुःखं राहोरन्तर्गते शनौ॥
गुरोर्वर्षौ २। १। १०। फलम्।
व्याधिदुःखभयैस्त्यक्तो देवब्राह्मणपूजकः।
कार्य्यसिद्धिर्भवेदिष्टा राहोरन्तर्गते गुरौ॥
एवं वर्षाः १२॥*॥ शुक्रस्य स्थूलदशावर्षाः २१।
तस्यान्तर्दशावर्षाः ४। १। फलम्।

मन्त्रप्रचाररुचिरप्रमदाविलास-
सम्मानदाननृपपूजनकोषलाभान्।
हस्त्यश्वयानपरिपूर्णमनोरथश्च
शौक्री दशा सृजति निश्चलराजलक्ष्मीम्॥

रवेर्वर्षः १। फलम्।
देहस्तीव्रव्रणाक्रान्तस्तीव्रतापी ज्वरान्वितः।
त्यक्तः स्याद्बान्धवैः सर्व्वैर्भार्गवान्तर्गते रवौ॥
सोमस्य वर्षौ २। ११। फलम्।
सम्माननाशो रोगश्च कार्य्यनाशश्च निश्चयः।
शुक्रस्यान्तर्गते चन्द्रे स्त्रीनाशो नियतं भवेत्॥
कुजस्य वर्षः १। ६। २०। फलम्।
उत्साही धनधान्याढ्यः कल्पश्च सुमनाः सुधीः।
भूमिलाभो भवेच्चैव शुक्रस्यान्तर्गते कुजे॥
बुधस्य वर्षाः ३। ३। २०। फलम्।
सर्व्वत्र लभते सौख्यं मानसञ्चयभूषणम्।
भार्य्या सुशीलतामेति भार्गवान्तर्गते बुधे॥
शनेर्वर्षः १। ११। १०। फलम्।
शत्रुक्षयमवाप्नोति मित्रवृद्धिश्च जायते।
चौराद्वित्तस्य लाभः स्यात् शुक्रस्यान्तर्गते शनौ॥
गुरोर्वर्षाः ३। ८। १०। फलम्।
राजपूजा सुखं प्रीतिः कन्याजननमेव च।
भार्गवान्तर्गते जीवे चौरान्नष्टञ्च लभ्यते॥
राहोर्वर्षौ २। ४। फलम्।
बन्धनं बन्धुपुत्राद्यैर्बन्धुनाशो रिपोर्भयम्।
शरीरं दैन्यमाप्नोति भृगोरन्तर्गतस्तमः॥
एवं वर्षाः २१। इत्यन्तर्दशाकथनम्॥*॥
अथ प्रत्यन्तर्दशा।
महान्तरं दिनं कृत्वा षष्टिलब्धं ध्रुवं भवेत्।
ध्रुवाणि गणयेद्धीमान् रव्यादेः क्रमतो यथा॥

रवौ च वेदा वसवः सुधांशौ
कुजे च बाणाः शशिजे तथाङ्काः।
शनावृतुर्दिक् च वृहस्पतौ स्या-
द्राहौ तुरङ्गा भृगुजे च रुद्राः॥

महान्तर्दशामासान् दिनीकृत्य गुणायेत्तान्।
खाङ्कस्थं विभजेद्यात् प्रत्यन्तर्ध्रुववासरान्॥
इति प्रत्यन्तर्दशा॥” इति ज्योतिस्तत्त्वम्॥*॥
युगभेदे दशाविशेषा यथा,—
“सत्ये लग्नदशा चैव त्रेतायां हरगौरिका।
द्वापरे योगिनी चैव कलौ नाक्षत्रिकी दशा॥”
इति समयामृतम्॥*॥
दशधा दशा यथा,—
योगिनी १ वार्षिकी २ नाक्षत्रिकी ३ लाग्निकी ४ मुकुन्दा ५ विंशोत्तरा ६ त्रिंशोत्तरा ७ पताकी ८ हरगौरी ९ दिनदशा १०। इति जातरत्नम्॥
दशाकर्षः, पुं, (दशया वर्त्त्या आकर्षति तैलादिकमिति। आ+कृष्+अच्।) प्रदीपः। इति हेमचन्द्रः। ३। ३५१॥
दशाकर्षी, [न्] पुं, (दशया आकर्षतीति। दशा+कृष्+णिनिः।) प्रदीपः। इति हारावली।२४॥
दशाङ्गुलं, क्ली, (दश अङ्गुलय इव शिराचिह्नानि फलत्वगुपरि सन्त्यस्येति। अच्।) खर्ज्जूरम्। इति भावप्रकाशः॥ (दश अङ्गुलयः परिमाणमस्येति तद्धितार्थद्विगोः ठञ् तस्य लुक् समासान्तः अच्प्रत्ययः। दशाङ्गुलपरिमिते, त्रि। यथा, मनुः। ८। २७१।
“नामजातिग्रहं त्वेषामभिद्रोहेण कुर्व्वतः।
निःक्षेप्योऽयस्मयः शङ्कुर्ज्वलन्नास्ये दशाङ्गुलः॥”
यथा च ऋग्वेदे। १०। ९०। १।
“सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्।
स भूमिं विश्वतो वृत्वात्यतिष्ठद्दशाङ्गुलम्॥”
“विश्वतः सर्व्वतो वृत्वा परिवेष्ट्य दशाङ्गुलं दशाङ्गुलपरिमितं देशमत्यतिष्ठत्।” इति तद्भाष्ये सायनः॥”)
दशाननः, पुं, (दश आननानि वदनानि यस्य।) रावणः। इति शब्दरत्नावली॥ (दश आननानि इति विग्रहे दशवदनेष्वपि, क्ली। यथा,

“युष्मत् कृते खञ्जनगञ्जनाक्षि!
शिरो मदीयं यदि याति यातु।
लूनानि नूनं जनकात्मजार्थे
दशाननेनापि दशाननानि॥”
इत्युद्भटः॥)

दशानिकः, पुं, (अन्यते इति भावे घञ् आनो जीवनम्। तस्मिन् हितः आनिकः। दशायां अवस्थाविशेषे आनिकः।) दन्तीवृक्षः। इति शब्दचन्द्रिका॥
दशारुहा, स्त्री, (दशसु दिक्षु आरोहति अङ्गैर्वाप्नोतीति। आ+रुह+कः।) कैवर्त्तिका। इति राजनिर्घण्टः॥
दशार्णः, पुं, (दश ऋणानि दुर्गभूमयो जलाधारा वा यत्र। “ऋत्यकः।” ६।१।१२८। इत्यस्य “प्रवत्सतरकम्बलवसनार्णदशानामृणे।” इति वार्त्तिकोक्त्या वृद्धिः।) देशविशेषः। स विन्ध्यपर्व्वतस्य पूर्व्वदक्षिणस्यां दिशि वर्त्तते। (यथा, वृहत्संहितायाम्। १४। १०।
“किष्किन्ध्यकण्टकस्थलनिषादराष्ट्राणि पुरिक-दशार्णाः॥”
तद्देशाभिजनः तस्य राजा वा अण्। तद्देशवासिनि तन्नृपतौ च त्रि। यथा, महाभारते। १। ११३। २५।
“पूर्व्वमागस्कृतो गत्वा दशार्णाः समरे जिताः।
पाण्डुना नरसिंहेन कौरवाणां यशोभृता॥”
दश ऋणानि वर्णानि यत्र। दशाक्षरमन्त्रविशेषः। यथा, गौतमीयतन्त्रे। २ अध्याये।
“दशानामपि तत्त्वानां साक्षी वेत्ता तथाक्षरम्।
दशाक्षर इति ख्यातो मन्त्रराजः परात्परः॥
लुप्तबीजस्वभावत्वात् दशार्णं इति कथ्यते॥”)
नदीविशेषे, स्त्री। इति शब्दार्थकल्पतरुः॥
दशार्हः, पुं, (दशसु दानादिविषयेषु अर्हः।) बुद्धः। यदुदेशः। (क्रोष्टुवंशीयराजपुत्रविशेषः। यथा, हरिवंशे। ३६। २५।
“वृष्णेश्च जज्ञिरे शूराश्चयः परमधार्म्मिकाः।
आवन्तश्च दशार्हश्च बली विषहरश्च यः॥”)
तद्देशस्थे, पुं भूम्नि। इति त्रिकाण्डशेषः॥ (यथा, महाभारते। ३। १९। २०।

“नमश्चितं सर्व्वदशार्हपुङ्गै-
राशीर्विषाग्निज्वलनप्रकाशम्॥”)

दशावतारः, पुं, (दश अवताराः यस्य।) विष्णुः। इति त्रिकाण्डशेषः॥ तस्य दशावताराः यथा,—
मत्स्यः१ कूर्म्मः२ वराहः३ नृसिंहः४ वामनः५ जामदग्न्यः६ रामः७ कृष्णः८ बुद्धः९ कल्की१०। इति वराहपुराणम्॥ अपि च।
“धर्म्मान्नारायणस्यांशः संभूतश्चाक्षुषेऽन्तरे।
यज्ञश्च वर्त्तयामास देवो वैवस्वतेऽन्तरे॥
प्रादुर्भावे ततस्तस्य ब्रह्मा ह्यासीत् पुरोहितः।
युगाख्यायाश्च तुर्य्यान्तु आपन्नेषु सुरेषु वै॥
संभूतः स समुद्रान्ते हिरण्यकशिपोर्वधे।
द्वितीये नरसिंहाख्ये रुद्रो ह्यासीत् पुरोहितः॥
बलिसंस्थेषु लोकेषु त्रेतायां सप्तमं प्रति।
तृतीये वामनस्यार्थे धर्म्मेण तु पुरोधसा॥
एतास्तिस्रः स्मृतास्तस्य दिव्याः संभूतयो द्विजाः।
मानुष्याः सप्त येऽन्ये तु शापजास्तान्निबोधत॥
त्रेतायुगे तु प्रथमे दत्तात्रेयो बभूव ह।
नष्टे धर्म्मे चतुर्थांशे मार्कण्डेयपुरःसरः॥
पञ्चमः पञ्चदशान्तु त्रेतायां सम्बभूव ह।
मान्धाता चक्रवर्त्ती तु तस्थौतथ्यः पुरःसरः॥
एकोनविंशे त्रेतायां सर्व्वक्षत्रान्तकृद्विभुः।
जामदग्न्यस्तथा षष्ठो विश्वामित्रपुरःसरः॥
चतुर्व्विंशे युगे रामो वशिष्ठेन पुरोधसा।
सप्तमो रावणस्यार्थे जज्ञे दशरथात्मजः॥
अष्टमे द्वापरे विष्णुरष्टाविंशे पराशरात्।
वेदव्यासस्तथा जज्ञे जातूकर्ण्यपुरःसरः॥
कर्त्तुं धर्म्मव्यवस्थानमसुराणां प्रणाशनम्।
बुद्धो नवमके जज्ञे तपसा पुष्करेक्षणः॥
देवक्यां वसुदेवेन द्वैपायनपुरःसरः।
तस्मिन्नेव युगे क्षीणे सन्ध्याशिष्टे भविष्यति॥
कल्की विष्णुयशा नाम पाराशर्य्यपुरःसरः।
दशमो भाव्यसंभूतो याज्ञवल्क्यपुरःसरः॥”
इति मत्स्यपुराणम्॥